# अथ गणपाठः ।

## प्रथमोऽध्यायः ।

४७ **सर्वादीनि सर्वनामानि** १।१।२७॥ सर्व विश्व उभ उभय डतर डतम अन्य अन्यतर इतर त्वत् त्व नेम सम सिम । पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् । स्वमज्ञातिधनाख्यायाम् । अन्तरं बहिर्योगोपसंव्यानयोः । त्यद् तद् यद् एतद् इदम् अदस् एक द्वि युष्मद् अस्मद् भवतु किम् ॥ **इति सर्वादिः** ॥ १ ॥

१०२ **स्वरादिनिपातमव्ययम्** १।१।३७॥ स्वर अन्तर् प्रातर् । **अन्तोदात्ताः** । पुनर् सनुतर् उच्चैस् नीचैस् शनैस् ऋधक् ऋते युगपत् आरात् [ अन्तिकात् ] पृथक् । **आद्युदात्ताः** । ह्यस् श्वस् दिवा रात्रौ सायम् चिरम् मनाक् ईषत् [ शश्वत् ] जोषम् तूष्णीम् बहिस् [ अधस् ] अवस् समया निकषा स्वयम् मृषा नक्तम् नञ् हेतौ [ हे है ] इद्धा अद्धा सामि। **अन्तोदात्ताः** । वत् [ ५।१।१।१५ ] ब्राह्मणवत् क्षत्रियवत् सना सनत् सनात् उपधा तिरस् । **आद्युदात्ताः** । अन्तरा । **अन्तोदात्ताः** । अन्तरेण [ मक् ] ज्योक् [ योक् नक् ] कम् शम् सहसा [श्रद्धा] अलम् स्वधा वषट् विना नाना स्वस्ति अन्यत् अस्ति उपांशु क्षमा विहायसा दोषा मुधा दिष्ट्या वृथा मिथ्या । क्त्वातोसुन्कसुनः । कृन्मकारसंध्यक्षरान्तोऽव्ययीभावश्च । पुरा मिथो मिथस् प्रायस् मुहुस् प्रवाहुकम् प्रवाहिका आर्यहलम् अभीक्ष्णम् साकम् सार्थम् [ सत्रम् समम् ] नमस् हिरुक् । तसिलादयस्तद्धिता एधाच्पर्यन्ताः [५।३।७–४६] शस्तसी कृत्वसुच् सुच् आस्थालौ । च्व्यर्थाश्च । [अथ] अम् आम् प्रताम् प्रातान् प्रशान् । **आकृतिगणोऽयम्** । तेनान्येपि । तथाहि माङ् श्रम् कामम् [ प्रकामम् ] भूयस् परम् साक्षात् साचि ( सावि ) सत्यम् मंक्षु संवत् अवश्यम् सपदि प्रादुस् आविस् अनिशम् नित्यम् नित्यदा सदा अजस्रम् संततम् उषा ओम् भूर् भुवर् झटिति तरसा सुष्ठु कु अञ्जसा अ मिथु ( अमिथु ) विथक् भाजक् अन्वक् चिराय चिरम् चिररात्राय चिरस्य चिरेण चिरात् अस्तम् आनुषक् अनुषक् अनुषट् अम्नस् ( अम्भस् ) अम्नर् ( अम्भर् ) स्थाने वरम् दुष्ठु बलात् शु अर्वाक् शुदि वदि इत्यादि । तसिलादयः प्राक्पाशपः [ ६।३।३६ ] । शस्प्रभृतयः प्राक्समासान्तेभ्यः [ ५।४।४३–६८ ] मान्तः कृत्वोर्थः । तसिवती । नानाञाविति ॥ **इति स्वरादिः** ॥ २ ॥

७ **चादयोऽसत्त्वे** १।४।५७॥ च वा ह अह एव एवम् नूनम् शश्वत् युगपत् भुयस् सूपत् कूपत् कुवित् नेत् चेत् चण् कच्चित् यत्र तत्र नह हन्त माकिम् माकीम् माकिर् नकिम् नकिर् आकीम् माङ् नञ् तावत् यावत् त्वा त्वै द्वै न्वै रै [ रे ] श्रौषट् वौषट् स्वाहा स्वधा ओम् तथा तथाहि खलु किल अथ सुष्ठु स्म अ इ उ ऋ ऌ ए ऐ ओ औ आदह उञ् उकञ् वेलायाम् मात्रायाम् यथा यत् तत् किम् पुरा वधा ( वध्वा ) धिक् हाहा हेहै ( हहे ) पाट् प्याट् आहो उताहो हो अहो नो ( नौ ) अथो ननु मन्ये मिथ्या असि ब्रूहि तु नु इति इव वत् वात् वन बत [ सम् वशम् शिकम् दिकम्] सनुकं छंवट् ( छंबट् ) शङ्के शुकम् खम् सनात् सनुतर् नहिकम् सत्यम् ऋतम् अद्धा इद्धा नोचेत् नचेत् नहि जातु कथम् कुतः कुत्र अव अनु हा हे [ है ] आहोस्वित् शम् कम् खम् दिष्ट्या पशु नट् सह [ आनुषट् ] आनुषक् अङ्ग फट् ताजक् भाजक् अये अरे वाट् ( चाटु ) कुम् खुम् घुम् अम् ईम् सीम् सिम् सि वै । उपसर्गविभक्तिस्वरप्रतिरूपकाश्च निपाताः ॥ **आकृतिगणोऽयम्** ॥ **इति चादयः** ॥ ३ ॥

७ **प्रादयः** १।४।५४॥ प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उद् अभि प्रति परि उप ॥ **इति प्रादयः** ॥ ४ ॥

१७५ **ऊर्यादिच्विडाचश्च** १।४।६१। ऊरी उररी तन्थी ताली आताली वेताली धूली धूसी शकला शंसकला ध्वंसकला भ्रंसकला गुलगुधा सजूष् फल फली विक्ली आक्ली आलोष्ठी केवाली केवासी सेवाली पर्याली शेवाली वर्षाली अत्यूमशा वश्मशा मस्मसा मसमसा औषट् श्रौषट् वषट् स्वाहा स्वधा पांपी प्रादुस् श्रत् आविस् ॥ **इत्यूर्यादयः** ॥ ५ ॥

१७६ **साक्षात्प्रभृतीनि च** १।४।७४॥ साक्षात् मिथ्या चिन्ता भद्रा रोचना आस्था अमा अद्धा प्राजर्या प्राजरुहा बीजर्या बीजरुहा संसर्या अर्थे लवणम् उष्णम् शीतम् उदकम् आर्द्रम् अग्नौ वशे विकसने विहसने प्रतपने प्रादुस् नवस् । **आकृतिगणोऽयम्** ॥ **इति साक्षात्प्रभृतयः** ॥ ६ ॥

---

## द्वितीयोऽध्यायः ।

१५९ **तिष्ठद्गुप्रभृतीनि च** २।१।१७॥ तिष्ठद्गु वहद्गु आयतीगवम् खलेयवम् खलेबुसम् लूनयवम् लूयमानयवम् पूतयवम् पूयमानयवम् संहृतयवम् संह्रियमाणयवम् संहृतबुसम् संह्रियमाणबुसम् समभूमि समपदाति सुषमम् विषमम् दुःषमम्

निःषमम् अपसमम् आयतीसमम् [प्रोढम्] पापसमम् पुण्यसमम् प्राह्णम् प्ररथम् प्रमृगम् प्रदक्षिणम् [ अपरदक्षिणम् ] संप्रति असंप्रति । इच्प्रत्ययः समासान्तः । [ ५।४।१२७॥५।४।१२८ ] ॥ **इति तिष्ठद्गुप्रभृतयः** ॥ १ ॥

१६८ **सप्तमी शौण्डैः** २।१।४०॥ शौण्ड धूर्त कितव व्याड प्रवीण संवीत अन्तर अधि पटु पण्डित कुशल चपल निपुण । **इति शौण्डादयः** ॥ २ ॥

१६९ **पात्रेसमितादयश्च** २।१।४८॥ पात्रेसमिताः पात्रेबहुलाः उदुम्बरमशकः उदुम्बरकृमिः कूपकच्छपः अवटकच्छपः कूपमण्डूकः कुम्भमण्डूकः उदपानमण्डूकः नगरकाकः नगरवायसः मातरिपुरुषः पिण्डीशूरः पितरिशूरः गेहेशूरः गेहेनर्दी गेहे-क्ष्वेडी गेहेविजिती गेहेव्याडः गेहेमेही गेहेदाही गेहेदृप्तः गेहेधृष्टः गर्भेतृप्तः आखनिकबकः गोष्ठेशूरः गोष्ठेविजिती गोष्ठेक्ष्वेडी गोष्ठेपटुः गोष्ठेपण्डितः गोष्ठेप्रगल्भः कर्णेटिरिटिरा कर्णेचुरुचुरा ॥ **आकृतिगणोऽयम्** ॥ **इति पात्रेसमितादयः** ॥ ३ ॥

१७१ **उपमितं व्याघ्रादिभिः सामान्याप्रयोगे** २।१।५६॥ व्याघ्र सिंह ऋक्ष ऋषभ चन्दन वृक वृष वराह हस्तिन् तरु कुञ्जर रुरु पृषत् पुण्डरीक पलाश कितव ॥ **इति व्याघ्रादयः** ॥ ४ ॥ **आकृतिगणोऽयम्** । तेन मुखपद्मम् मुखक-मलम् करकिसलयम् पार्थिवचन्द्रः इत्यादि ॥ ४ ॥

१७२ **श्रेण्यादयः कृतादिभिः** २।१।५९।। श्रेणि एक पूग मुकुन्द राशि निचय विषय निधन पर इन्द्र देव मुण्ड भूत श्रमण वदान्य अध्यापक अभिरूपक ब्राह्मण क्षत्रिय [ विशिष्ट ] पटु पण्डित कुशल चपल निपुण कृपण ॥ **इत्येते श्रेण्यादयः** ॥ ५ ॥

२ कृत मित मत भूत उक्त [ युक्त ] समाज्ञात समाम्नात समाख्यात संभावित [ संसेवित ] अवधारित अवकल्पित निराकृत उपकृत उपाकृत [ दृष्ट कलित दलित उदाहृत विश्रुत उदित ] । **आकृतिगणोऽयम्** ॥ **इति कृतादिः** ॥ ६ ॥

१७२ ※ **शाकपार्थिवादीनामुपसंख्यानम्** ※ २।१।६०॥ शाकपार्थिव कुतुपसौश्रुत अजातौल्वलि । **आकृतिगणो-ऽयम्** । कृतापकृत भुक्तविभुक्त पीतविपीत गतप्रत्यागत यातानुयात क्रयाक्रयिका पुटापुटिका फलाफलिका मानोन्मानिका ॥ **इति शाकपार्थिवादिः** ॥ ७ ॥

१७३ **कुमारः श्रमणादिभिः** ३।१।७०॥ श्रमणा प्रव्रजिता कुलटा गर्भिणी तापसी दासी बन्धकी अध्यापक अभिरूपक पण्डित पटु मृदु कुशल चपल निपुण ॥ **इति श्रमणादयः** ॥ ८ ॥

१७३ **मयूरव्यंसकादयश्च** २।१।७२॥ मयूरव्यंसक छात्रव्यंसक कम्बोजमुण्ड यवनमुण्ड । छन्दसि । हस्तेगृह्य ( हस्तगृह्य ) पादेगृह्य ( पादगृह्य ) लाङ्गूलेगृह्य (लाङ्गूलगृह्य) पुनर्दाय । एहीडादयोऽन्यपदार्थे । एहीडं एहियवं च एहिवाणिजा क्रिया अपेहिवाणिजा प्रेहिवाणिजा एहिस्वागता अपेहिस्वागता एहिद्वितीया अपेहिद्वितीया प्रेहिद्वितीया एहिकटा अपेहिकटा प्रेहिकटा आहरकरटा प्रेहिकर्दमा प्रोहकर्दमा विधमचूडा उद्धमचूडा ( उद्धरचूडा ) आहरचेला आहरवसना [ अहरसेना ] आहरवनिता ( अहरविनता ) कृन्तविचक्षणा उद्धरोत्सृजा उद्धरावसृजा उद्धमविधमा उत्पचनिपचा उत्पतनिपता उच्चावचम् उच्चनीचम् आचोपचम् आचपराचम् [ नखप्रचम् ] निश्चप्रचम् आकिंचन स्नात्वाकालक पीत्वास्थिरक भुक्त्वासुहित प्रोष्यपापीयान् उत्पत्यपाकला निपत्यरोहिणी निषण्णश्यामा अपेहिप्रघसा एहिविघसा इहपञ्चमी इहद्वितीया । जहि कर्मणा बहुलमाभीक्ष्ण्ये कर्तारं चाभिदधाति । जहिजोडः । जहिजोडम् । जहिस्तम्बम् । जहिस्तम्बः [ उज्जहिस्तम्बम् ] । आख्या-तमाख्यातेन क्रियासातत्ये । अश्नीतपिबता पचतभृज्जता खादतमोदता खादतवमता । खादताचमता । आहरनिवपा आहर-निष्किरा । आवपनिष्किरा । उत्पचविपचा भिन्धिलवणा कृन्धिविचक्षणा पचलवणा प्रचप्रकूटा । **आकृतिगणोऽयम्** ॥ तेन । अकुतोऽभयः । कान्दिशीकः । कान्देशीकः । आहोपुरुषिका अहमहमिका यदृच्छा एहिरेयाहिरा उन्मृजावमृजा द्रव्यान्तरम् अवश्यकार्यम् ॥ **इत्यादिमयूरव्यंसकादयः** ॥ ९ ॥

१६४ **याजकादिभिश्च** २।२।९॥ याजक ॥ पूजक परिचारक परिवेषक । परिषेचक । स्नापक अध्यापक उत्साह उद्वर्तक होतृ भर्तृ रथगणक पत्तिगणक ॥ **इति याजकादयः** ॥ १० ॥

१९५ **राजदन्तादिषु परम्** २।२।३१॥ राजदन्तः अग्रेवणम् लिप्तवासितम् नग्नमुषितम् सिक्तसंमृष्टम् मृष्टलुञ्चितम् अवक्लिन्नपक्वम् अर्पितोतम् । अर्पितोप्तम् । उप्तगाढम् उलूखलमुसलम् तण्डुलकिण्वम् दृषदुपलम् आरग्वायनि । आरग्वायन-बन्धकी । चित्ररथबाह्लीकम् । अवन्त्यश्मकम् शूद्रार्यम् स्नातकराजानौ विष्वक्सेनार्जुनौ अक्षिभ्रुवम् दारगवम् शब्दार्थौ धर्मार्थौ कामार्थौ अर्थशब्दौ अर्थधर्मौ अर्थकामौ वैकारिमतम् गाजवाजम् । गोजवाजम् । गोपालिधानपूलासम् । गोपालधानीपूलासम् पूलासकारण्डम् । पूलासककुरण्डम् । स्थूलासम् । स्थूलपूलासम् । उशीरबीजम् । [ जिज्ञास्थि ] सिञ्जास्थम् । सिञ्जाश्व-त्थम् । चित्रास्वाती । चित्रस्वाती । भार्यापती दंपती जंपती जायापती पुत्रपती पुत्रपशु केशश्मश्रू शिरोबिजु । शिरो-बीजम् । शिरोजानु सर्पिर्मधुनी मधुसर्पिषी [ आद्यन्तौ ] अन्तादी गुणवृद्धी वृद्धिगुणौ ॥ **इति राजदन्तादिः** ॥ ११ ॥

१९४ **वाहिताग्न्यादिषु** २।२।३७ ॥ आहिताग्नि जातपुत्र जातदन्त जातश्मश्रु तैलपीत घृतपीत [ मद्यपीत ] ऊढभार्य गतार्थ ॥ **आकृतिगणोऽयम्** । तेन । गडुकण्ठ अस्युद्यत ( अस्युद्यत ) दण्डपाणिप्रभृतयोऽपि ॥ **इत्याहिताग्न्यादयः ॥ १२ ॥**

१७३ **कडाराः कर्मधारये** २।२।३८ ॥ कडार गडुल खञ्ज खोड काण कुण्ठ खलति गौर वृद्ध भिक्षुक पिङ्ग पिङ्गल ( पिङ्गल ) तड तनु [ जठर ] बधिर मठर कञ्ज बर्बर ॥ **इति कडारादयः ॥ १३ ॥**

१४२ ॐ **नौकाकान्नशुकशृगालवर्ज्येषु** ॐ २।३।१७ ॥ नौ काक अन्न शुक शृगाल ॥ **इति नावादयः ॥ १४ ॥**

१३७ ॐ **प्रकृत्यादिभ्य उपसंख्यानम्** ॐ २।३।१८ ॥ प्रकृति प्राय गोत्र सम विषम द्विद्रोण पञ्चक साहस्र ॥ **इति प्रकृत्यादयः ॥ १५ ॥**

१९७ **गवाश्वप्रभृतीनि च** २।४।११ ॥ गवाश्वम् गवाविकम् गवैडकम् अजाविकम् अजैडकम् कुब्जवामनम् कुब्जकिरातम् पुत्रपौत्रम् श्वचण्डालम् स्त्रीकुमारम् दासीमाणवकम् शाटीपटीरम् शाटीप्रच्छदम् शाटीपट्टिकम् उष्ट्रखरम् उष्ट्रशशम् मूत्रशकृत् मूत्रपुरीषम् यकृन्मेदः मांसशोणितम् दर्भशरम् दर्भपूतीकम् अर्जुनशिरीषम् अर्जुनपुरुषम् तृणोपलम् [ तृणोलपम् ] दासीदासम् कुटीकुटम् भागवतीभागवतम् ॥ **इति गवाश्वप्रभृतीनि ॥ १६ ॥**

१९८ **न दधिपयआदीनि** २।४।१४ ॥ दधिपयसी सर्पिर्मधुनी मधुसर्पिषी ब्रह्मप्रजाती शिववैश्रवणौ स्कन्दविशाखौ परिव्राजककौशिकौ ( परिव्राट्कौशिकौ ) प्रवर्ग्योपसदौ शुक्लकृष्णौ इध्माबर्हिषी दीक्षातपसी [ श्रद्धातपसी मेधातपसी ] अध्ययनतपसी उलूखलमुसले आद्यवसाने श्रद्धामेधे ऋक्सामे वाङ्मनसे ॥ **इति दधिपयआदीनि ॥ १७ ॥**

१८१ **अर्धर्चाः पुंसि च** २।४।३१ ॥ अर्धर्च गोमय कषाय कार्षापण कुपत कुसप ( कुणप ) कपाट शङ्ख गूथ यूथ ध्वज कबन्ध पद्म गृह सरक कंस दिवस यूष अन्धकार दण्ड कमण्डलु मण्ड भूत द्वीप द्यूत चक्र धर्म कर्मन् मोदक शतमान यान नख नखर चरण पुच्छ दाडिम हिम रजत सक्तु पिधान सार पात्र घृत सैन्धव औषध आढक चषक द्रोण खलीन पात्रीव षष्टिक वारबाण ( वारवारण ) प्रोथ कपित्थ [ शुष्क ] शाल शील शुल्क ( शुल्क ) शीधु कवच रेणु [ ऋण ] कपट शीकर मुसल सुवर्ण वर्ण पूर्व चमस क्षीर कर्ष आकाश अष्टापद मङ्गल निधन निर्यास जृम्भ वृत्त पुस्त बुस्त क्ष्वेडित शृङ्ग निगड [ खल ] मूलक मधु मूल स्थूल शराव नाल वप्र विमान मुख प्रग्रीव शूल वज्र कटक कण्टक [ कर्पट ] शिखर कल्क ( वल्कल ) नटमक ( नाटमस्तक ) वलय कुसुम तृण पङ्क कुण्डल किरीट [ कुमुद ] अर्बुद अङ्कुश तिमिर आश्रय भूषण इल्वस ( इष्वास ) मुकुल वसन्त तटाक ( तडाग ) पिटक विटङ्क विडङ्ग पिण्याक माष कोश फलक दिन दैवत पिनाक समर स्थाणु अनीक उपवास शाक कर्पास [ विशाल ] चषाल ( चखाल ) खण्ड दर विपट [ रण बल मक ] मृणाल हस्त आर्द्र हल [ सूत्र ] ताण्डव गाण्डीव मण्डप पटह सौध योध पार्श्व शरीर फल [ छल ] पुर ( पुरा ) राष्ट्र अम्बर बिम्ब कुट्टिम मण्डल ( कुक्कुट ) कुडप ककुद खण्डल तोमर तोरण मञ्चक पञ्चक पुङ्ख मध्य [ बाल ] छाल वाल्मीक वर्ष वस्त्र वसु देह उद्यान उद्योग स्नेह स्तेन [ स्तन स्वर ] संगम निष्क क्षेम शूक क्षत्र पवित्र [ यौवन कलह ] मालक ( पालक ) मूषिक [ मण्डल वल्कल ] कुज ( कुञ्ज ) विहार लोहित विषाण भवन अरण्य पुलिन दृढ आसन ऐरावत शूर्प तीर्थ लोमन ( लोमश ) तमाल लोह दण्डक शपथ प्रतिसर दारु धनुस् मान वर्चस्क कूर्च तण्डक मठ सहस्र ओदन प्रवाल शकट अपराह्ण नीड शकल तण्डुल ॥ **इत्यर्धर्चादिः ॥ १८ ॥**

२१६ **पैलादिभ्यश्च** २।४।५९ ॥ पैल शालङ्कि सात्यकि सात्यंकामि राहवि रावणि औदञ्चि औदव्रजि औदमेधि औदव्यज्रि ( औदमज्जि ) औदभृज्जि दैवस्थानि पैङ्गलोदायनि राहक्षति भौलिङ्गि राणि औदन्यि औद्वाहमानि औज्जिहानि औदशुद्धि तद्राजाच्चाणः ( तद्राज ) ॥ **आकृतिगणोऽयम् ॥ इति पैलादिः ॥ १९ ॥**

२१६ **न तौल्वलिभ्यः** २।४।६१ ॥ तौल्वलि धारणि पारणि रावणि दैलीपि दैवति वार्कलि नैवति ( नैवकि ) दैवमित्रि ( दैवमति ) दैवयज्ञि चाफट्टकि बैल्वकि वैकि ( वैङ्कि ) आनुहारति ( अनुराहति ) पौष्करसादि आनुरोहति आनुति प्रादोहनि नैमिश्रि प्राडाहति बान्धकि वैशीति आसिनासि आहिंसि आसुरी नैमिषि आसिबन्धकि पौष्पि कारेणुपालि वैकर्णि वैरकि वैहति ॥ **तौल्वल्यादिः ॥ २० ॥**

२२५ **यस्कादिभ्यो गोत्रे** २।४।६३ ॥ यस्क लह्य द्रुह्य अयस्थूण ( अयःस्थूण ) तृणकर्ण सदामत्त कम्बलहार बहिर्योग पर्णाढक कर्णाढक पिण्डीजङ्घ बकसक्थ ( वकसक्थ ) विश्रि कुद्रि अजवस्ति मित्रयु रक्षोमुख जङ्घारथ उत्कास कटुक मथक ( मन्थक ) पुष्करद ( पुष्करसद् ) विषपुट उपरिमेखल क्रोष्टुकमान ( क्रोष्टुमान ) क्रोष्टुपाद क्रोष्टुमाय शीर्षमाय खरप पदक वर्मुक भलन्दन भडिल भण्डिल भडित भण्डित ॥ **एते यस्कादयः ॥ २१ ॥**

२२५ **न गोपवनादिभ्यः** २।२।६७ ॥ गोपवन शैग्रु (शिग्रु) बिन्दु भाजन अश्वावतान श्यामाक ( श्योमाक ) श्यामक श्यापर्ण ॥ **बिदाद्यन्तर्गणोऽयम्** ४।१।१०४ ॥ **गोपवनादिः ॥ २२ ॥**

२२५ **तिककितवादिभ्यो द्वन्द्वे** २।४।६८ ॥ तिककितवाः वङ्खरभण्डीरथाः उपकलमकाः पफकनरकाः बकनख-गुदपरिणद्धाः उब्जककुभाः लङ्कशान्तमुखाः उत्तरशलङ्कटाः कृष्णाजिनकृष्णसुन्दराः भ्रष्टककपिष्ठलाः अग्निवेशदशेरुकाः ॥ **एते तिककितवादयः ॥ २३ ॥**

२२५ **उपकादिभ्योऽन्यतरस्यामद्वन्द्वे** २।४।६९ ॥ उपक लमक भ्राष्टक कपिष्ठल कृष्णाजिन कृष्णसुन्दर चूडा-रक आडारक गडुक उदङ्क सुधायुक अबन्धक पिङ्गलक पिष्ट सुपिष्ट ( सुपिष्ठ ) मयूरकर्ण खरीजङ्घ शलाथल पतञ्जल पदञ्जल कठेरणि कुषीतक कशकृत्स्न ( काशकृत्स्न ) निदाघ कलशीकण्ठ दामकण्ठ कृष्णपिङ्गल कर्णक पर्णक जटिरक बधिरक जन्तुक अनुलोम अनुपद प्रतिलोम जपजग्ध प्रतान अनभिहित कमक वराटक लेखाभ्र कमन्दक पिञ्जूल वर्णक मसूरकर्ण मदाघ कवन्तक कमन्तक कदामत दामकण्ठ ॥ **एते उपकादयः ॥ २४ ॥**

---

## तृतीयोऽध्यायः ।

४२७ **भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः** ३।१।१२ ॥ भृश शीघ्र चपल मन्द पण्डित उत्सुक सुमनस् दुर्मनस् अभिमनस् उन्मनस् रहस् रोहत् रेहत् संश्वत् तृपत् शश्वत् भ्रमत् वेहत् शुचिस् शुचिवर्चस् अण्डर वर्चस् ओजस् सुरजस् अरजस् **एते भृशादयः ॥ १ ॥**

४२८ **लोहितादिडाज्भ्यः क्यष्** ३।१।१३ ॥ लोहित चरित नील फेन मद्र हरित दास मन्द ॥ **लोहितादि-राकृतिगणः ॥ २ ॥**

४२९ **सुखादिभ्यः कर्तृवेदनायाम्** ३।१।१८ ॥ सुख दुःख तृप्त कृच्छ्र अस्र आस्र अलीक प्रतीप करुण कृपण सोढ ॥ **इत्येतानि सुखादीनि २ ॥ ३ ॥**

४३२ **कण्ड्वादिभ्यो यक्** ३।१।२७ ॥ कण्डूम् मन्तु हृणीङ् वल्गु असु [ मनस् ] महीङ् लाट् लेट् इरस् इरज् इरम् दुवस् उषस् वेद् मेधा कुषुभ ( नमस् ) मगध तन्तस् पम्पस् ( पपस् ) सुख दुःख [ भिक्ष चरण चरम अवर ] सपर अरर ( अरर् ) भिषज् भिष्णज् [ अपर आर ] इषुध वरण चुरण तुरण भुरण गद्गद एला केला खेला [ वेला शेला ] लिट् लोट् [ लेखा लेख ] रेखा द्रवस् तिरस् अगद उरस् तरण ( तरिण ) पयस् संभूयस् सम्बर ॥ **आकृतिगणोऽयम् ॥ इति कण्ड्वादिः ॥ ४ ॥**

४६६ **नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः** ३।१।१३४ ॥ १ नन्दिवाशिमदिदूषिसाधिवर्धिशोभिरोचिभ्यो ण्यन्तेभ्यः संज्ञायाम् । नन्दनः वाशनः मदनः दूषणः साधनः वर्धनः शोभनः रोचनः । सहितपिदमः संज्ञायाम् । सहनः तपनः दमनः जल्पनः रमणः दर्पणः संक्रन्दनः संकर्षणः संहर्षणः जनार्दनः यवनः मधुसूदनः विभीषणः लवणः चित्तविनाशनः कुलदमनः [ शत्रुदमनः ] ॥ **इति नन्द्यादिः ॥ ५ ॥**

२ ग्राही उत्साही उद्दासी उद्भासी स्थायी मन्त्री संमर्दी । रक्षश्रुवपशां नौ । निरक्षी निश्रावी निवापी निशायी । याचृ-व्याहृव्रजवदवसां प्रतिषिद्धानाम् । अयाची अव्याहारी असंव्याहारी अव्राजी अवादी अवासी । अचामचित्तकर्तृकाणाम् अकारी अहारी अविनायी [ विशायी विषायी ] विशयी विषयी देशे । विशयी विषयी देशः । अभिभावी भूते । अपराधी उपरोधी परिभवी परिभावी ॥ **इति ग्रहादिः ॥ ६ ॥**

३ पच वच वप वद चल पत नदट् भषट् प्लवट् चरट् गरट् तरट् चोरट् गाहट् सूरट् देवट् [ दोषट् ] जर ( रज ) मर ( मद ) क्षम ( क्षप ) सेव मेष कोप ( कोष ) मेध नर्त व्रण दर्श सर्प [ दम्भ दर्प ] जारभार श्वपच ॥ **पचादिरा-कृतिगणः ॥ ७ ॥**

४६९ ※ **कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम्** ※ ३।२।५ ॥ मूलविभुज नखमुच काकगुह कुमुद महीध्र कुध्र गिध्र ॥ **आकृतिगणोऽयम् ॥ इति मूलविभुजादयः ॥ ८ ॥**

४७० ※ **पार्श्वादिषूपसंख्यानम्** ※ ३।२।१५ ॥ पार्श्व उदर पृष्ठ उत्तान अवमूर्धन् ॥ **इति पार्श्वादिः ॥ ९ ॥**

५४३ **भविष्यति गम्यादयः** ३।३।३ ॥ गमी आगमी भावी प्रस्थायी प्रतिरोधी प्रतियोधी प्रतिबोधी प्रतियायी प्रतियोगी ॥ **एते गम्यादयः ॥ १० ॥**

५४९ ※ **संपदादिभ्यः क्विप्** ※ ३।३।९४ ॥ संपद् विपद् आपद् प्रतिपद् परिषद् ॥ **एते संपदादयः ॥ ११ ॥**

५५० **षिद्भिदादिभ्योऽङ्** ३।३।१०४ ॥ भिदा विदारणे । छिदा द्वैधीकरणे । विदा । क्षिपा । गुहा गिर्योषध्योः श्रधा मेधा गोधा । आरा शस्त्र्याम् । हारा । कारा बन्धने । क्षिया । तारा ज्योतिषि । धारा प्रपातने । रेखा चूडा पीडा वपा वसा मृजा । क्रपेः संप्रसारणं च । कृपा ॥ **इति भिदादिः ॥ १२ ॥**

५४३ **भीमादयोऽपादाने** ३।४।७४ ॥ भीम भीष्म भयानक वह चर ( वह चरु ) प्रस्कन्दन प्रपतन ( प्रतपन ) समुद्र स्रुव स्रुक् वृष्टि ( दृष्टि ) रक्षः संकसुक ( शङ्कुसुक ) मूर्ख खलति ॥ **आकृतिगणोऽयम्** ॥ **इति भीमादिः** ॥१३॥

---

## चतुर्थोऽध्यायः ।

१०६ **अजाद्यतष्टाप्** ४।१।४ ॥ अजा एडका कोकिला चटका अश्वा मूषिका बाला होडा पाका वत्सा मन्दा विलाता पूर्वापिहाणा ( पूर्वापहाणा ) अपरापहाणा । संभस्त्राजिनशणपिण्डेभ्यः फलात् । सदच्काण्डप्रान्तशतैकेभ्यः पुष्पात् । शूद्रा चामहत्पूर्वा जातिः । क्रुञ्चा उष्णिहा देवविशा ज्येष्ठा कनिष्ठा । मध्यमा पुंयोगेऽपि । मूलान्नञः दंष्ट्रा ॥ **एतेऽजादयः** ॥ १ ॥

७१ **न षट्स्वस्रादिभ्यः** ४।१।१० ॥ स्वसृ दुहितृ ननान्दृ यातृ मातृ तिसृ चतसृ ॥ **इति स्वस्रादिः** ॥ २ ॥

११७ **नित्यं सपत्न्यादिषु** ४।१। ३५॥ समान एक वीर पिण्ड श्व ( शिरि ) भ्रातृ भद्र पुत्र । दासाच्छन्दसि ॥ **इति समानादिः** ॥ ३ ॥

११८ **षिद्गौरादिभ्यश्च** ४।१।४१ ॥ गौर मत्स्य मनुष्य शृङ्ग पिङ्गल हय गवय मुकय ऋष्य [ पुट तूण ] द्रुण द्रोण हरिण कोकण ( काकण ) पटर उणक [ आमल ] आमलक कुबल बिम्ब बदर फर्कर ( कर्करक ) तर्कार शर्कार पुष्कर शिखण्ड सलद शष्कण्ड सनन्द सुषम सुषव अलिन्द गडुल षाण्डश आढक आनन्द आश्वत्थ सृपाट आखक ( आपच्चिक ) शष्कुल सूर्य ( सूर्म ) शूर्प सूच यूष ( पूष ) यूथ सूप मेथ वल्लक धातक सल्लक मालक मालत साल्वक वेतस वृक्ष ( वृस ) अतस [ उभय ] भृङ्ग मह मठ छेद पेश मेद श्वन् तक्षन् अनडुही अनड्वाही । एषणः करणे । देह देहल काकादन गवादन तेजन रजन लवण औद्गाहमानि आद्गाहमानि गौतम ( गोतम ) [ पारक ] अयस्थूण ( अयःस्थूण ) भारिकि भौलिकि भौलिङ्गि यान मेध आलम्बि आलजि आलब्धि आलक्षि केवाल आपक आरट नट टोट नोट मूलाट शातन [ पोतन ] पातन पाठन ( पानठ ) आस्तरण अधिकरण अधिकार अग्रहायणी ( आग्रहायणी ) प्रत्यवरोहिणी [ सेचन ] सुमङ्गलात्संज्ञायाम् । अण्डर सुन्दर मण्डल मन्थर मङ्गल पट पिण्ड [ षण्ड ] उर्द गुर्द शम सूद औड ( आर्द्र ) हृद ( ह्रद ) पाण्ड [ भाण्डल ] भाण्ड [ लोहाण्ड ] कदर कन्दर कदल तरुण तलुन कल्माष बृहत् महत् [ सोम ] सौधर्म । रोहिणी नक्षत्रे । रेवती नक्षत्रे । विकल निष्कल पुष्कल । कटाच्छ्रोणिवचने । पिप्पल्यादयश्च । पिप्पली हरितकी ( हरीतकी ) कोशातकी शमी वरी शरी पृथिवी क्रोष्टु मातामह पितामह ॥ **इति गौरादिः** ॥ ४ ॥

१२० **बह्वादिभ्यश्च** ४। १।४५ ॥ बहु पद्धति अञ्चति अङ्कति अंहति शकटि ( शकति ) शक्तिः शस्त्रे । शारि वारि राति राधि [ शाधि ] अहि कपि यष्टि मुनि । इतः प्राण्यङ्गात् । कृदिकारादक्तिनः । सर्वतोऽक्तिन्नर्थादित्येके । चण्ड अराल कृपण कमल विकट विशाल विशङ्कट भरुज ध्वज चन्द्रभागान्नद्याम् ( चन्द्रभागा नद्याम् ) कल्याण उदार पुराण अहन् क्रोड नख खुर शिखा बाल शफ गुद ॥ **आकृतिगणोऽयम्** । तेन भग गल राग इत्यादि ॥ **इति बह्वादयः** ॥ ५ ॥

१२५ **शार्ङ्गरवाद्यञो ङीन्** ४।१।७३ ॥ शार्ङ्गरव कापटव गौग्गुलव ब्राह्मण बैद गौतम कामण्डलेय ब्राह्मणकृतेय [ आनिचेय ] आनिधेय आशोकेय वात्स्यायन मौञ्जायन कैकस काप्य ( काव्य ) शैब्य एहि पर्येहि आश्मरथ्य औदपान अराल चण्डाल वतण्ड । भोगवद्गौरिमतोः संज्ञायां घादिषु [ ६।३।४३ ] नित्यं ह्रस्वार्थम् । नृनरयोर्वृद्धिश्च ॥ **इति शार्ङ्गरवादिः** ॥ ६ ॥

२३० **क्रौड्यादिभ्यश्च** ४।१।८० क्रौडि लाडि व्याडि आपिशलि आपक्षिति चौटयत चैपयत ( वैटयत ) सैकयत बैल्वयत सौधातकि । सूत युवत्याम् । भोज क्षत्रिये । यौतकि कौटि भौरिकि भौलिकि [ शाल्मलि ] शालास्थलि कापिष्ठलि गौकक्ष्य ॥ **इति क्रौड्यादिः** ॥ ७ ॥

२१४ **अश्वपत्यादिभ्यश्च** ४।१।८४ ॥ अश्वपति [ ज्ञानपति ] शतपति धनपति गणपति [ स्थानपति यज्ञपति ] राष्ट्रपति कुलपति गृहपति [ पशुपति ] धान्यपति धन्वपति [ बन्धुपति धर्मपति ] सभापति प्राणपति क्षेत्रपति ॥ **इत्यश्वपत्यादिः** ॥ ८ ॥

२१५ **उत्सादिभ्योऽञ्** ४।१।८६ ॥ उत्स उदपान विकर विनद महानद महासन महाप्राण तरुण तलुन । बष्कयासे । पृथिवी [ धेनु ] पङ्क्ति जगती त्रिष्टुप् अनुष्टुप् जनपद भरत उशीनर ग्रीष्म पीलुकुण । उदस्थान देशे । पृषदंश भल्लकीय रथंतर मध्यंदिन बृहत् महत् सत्त्वत् कुरु पाञ्चाल इन्द्रावसान उष्णिह् ककुभ् सुवर्ण देव ग्रीष्मादच्छन्दसि ॥ **इत्युत्सादिः** ॥ ९ ॥

२२० **बाह्वादिभ्यश्च** ४।१।९६ ॥ बाहु उपबाहु उपवाकु निवाकु शिवाकु वटाकु उपनिन्दु ( उपविन्दु ) वृषली वृकला चूडा बलाका मूषिका कुशला भगला ( छगला ) ध्रुवका [ धुवका ] सुमित्रा दुर्मित्रा पुष्करसद् अनुहरत् देवशर्मन् अग्निशर्मन् [ भद्रशर्मन् ] सुशर्मन् कुनामन् ( सुनामन् ) पञ्चन् सप्तन् अष्टन् । अमितौजसः सलोपश्च । सुधावत् उदञ्चु शिरस् माष शराविन् मरीची क्षेमवृद्धिन् शृङ्खलतोदिन् खरनादिन् नगरमर्दिन् प्राकारमर्दिन् लोमन् अजीगर्त कृष्ण युधिष्ठिर अर्जुन साम्ब गद प्रद्युम्न राम ( उदङ्क ) उदकः संज्ञायाम् । संभूयोम्भसोः सलोपश्च ॥ **आकृतिगणोऽयम्** ॥ तेन सात्त्वकिः जाङ्घिः ऐन्दशार्मिः आजधेनविः इत्यादि ॥ **इति बाह्वादयः** ॥ १० ॥

२२१ **गोत्रे कुञ्जादिभ्यश्च्फञ्** ४।१।९८ कुञ्ज ब्रध्न शङ्ख भस्मन् गण लोमन् शठ शाक शुण्डा शुभ विपाश् स्कन्द स्कम्भ ॥ **इति कुञ्जादिः** ॥ ११ ॥

२२१ **नडादिभ्यः फक्** ४।१।९९ ॥ नड चर ( वर ) बक मुञ्ज इतिक इतिश उपक ( एक ) लमक शलङ्कु कलङ्कं च । सप्तल वाजप्य तिक । अग्निशर्मन्वृषगणे । प्राण नर सायक दास मित्र द्वीप पिङ्गर पिङ्गल किङ्कर किङ्कल ( कातर ) फातल काश्यप ( कुश्यप ) काश्य काल्य ( काव्य ) अज अमुष्य ( अमुष्म ) कृष्णरणौ ब्राह्मणवासिष्ठे । अमित्र लिगु चित्र कुमार । क्रोष्टु क्रोष्टं च । लोह दुर्ग स्तम्भ शिंशपा अग्र तृण शकट सुमनस् सुमत मिमत ऋच् जलंधर अध्वर युगंधर हंसक दण्डिन् हस्तिन् [ पिण्ड ] पञ्चाल चमसिन् सुकृत्य स्थिरक ब्राह्मण चटक बदर अश्वल खरप लङ्क इन्ध अस्त्र कामुक ब्रह्मदत्त उदुम्बर शोण अलोह दण्डप ॥ **इति नडादिः** ॥ १२ ॥

२२१ **अनृष्यानन्तर्ये बिदादिभ्योऽञ्** ४।१।१०४ ॥ बिद उर्व कश्यप कुशिक भरद्वाज उपमन्यु किलात कन्दर्प ( किंदर्भ ) विश्वानर ऋषिषेण ( ऋष्टिषेण ) ऋतभाग हर्यश्व प्रियक आपस्तम्ब कूचवार शरद्वत् शुनक ( शुनक् ) धेनु गोपवन शिग्रु बिन्दु [ भोगक ] भाजन ( शमिक ) अश्वावतान श्यामाक श्यामक ( श्यावलि ) श्यापर्ण हरित किंदास बह्यस्क अर्कजूष ( अर्कलूष ) बध्योग विष्णुवृद्ध प्रतिबोध रचित ( रथीतर ) रथन्तर गविष्ठिर निषाद ( शबर अलस ) मठर ( मृडाकु ) सपाकु मृदु पुनर्भू पुत्र दुहितृ ननान्द । परस्त्री परशुं च ॥ **इति बिदादिः** ॥ १३ ॥

२२२ **गर्गादिभ्यो यञ्** ४।१।१०५ गर्ग वत्स । वाजासे । संकृति अज व्याघ्रपात् विदभृत् प्राचीनयोग ( अगस्ति ) पुलस्ति चमस रेभ अग्निवेश शङ्ख शट शक एक धूम अवट मनस् धनंजय वृक्ष विश्वावसु जरमाण लोहित शंसित बभ्रु वल्गु मण्डु गण्डु शङ्कु लिगु गुहलु मन्तु मङ्क्षु अलिगु जिगीषु मनु तन्तु मनायीसूनु कथक कन्थक ऋक्ष तृक्ष ( वृक्ष ) [ तनु ] तरुक्ष तलुक्ष तण्ड वतण्ड कपिकत ( कपि कत ) कुरुकत अनडुह् कण्व शकल गोकक्ष अगस्त्य कण्डिनी यज्ञवल्क पर्णवल्क अभयजात विरोहित वृषगण रहूगण शण्डिल वर्णक ( चणक ) चुलुक मुद्गल मुसल जमदग्नि पराशर जतूकर्ण ( जातूकर्ण ) महित मन्त्रित अश्मरथ शर्कराक्ष पूतिमाष स्थूरा अदरक ( अररक ) एलाक पिङ्गल कृष्ण गोलन्द उलूक तितिक्ष भिषज ( भिषज् ) [ भिष्णज ] भडित भण्डित दल्भ चेकित चिकित्सित देवहू इन्द्रहू एकलु पिप्पलु बृहदग्नि [ सुलोहिन् ] सुलाभिन् उक्थ कुटीगु ॥ **इति गर्गादिः** ॥ १४ ॥

२२२ **अश्वादिभ्यः फञ्** ४।१।११० ॥ अश्व अश्मन् शङ्ख शूद्रक विद पुट रोहिण खर्जूर ( खजूर ) [ खञ्जार वस्त ] पिञ्जूल भडिल भण्डिल भडित भण्डित [ प्रकृत रामोद ] क्षान्त [ काश तीक्ष्ण गोलाङ्क अर्क स्वर स्फुट चक्र श्रविष्ठ ] पविन्द पवित्र गोमिन् श्याम धूम धूम्र वाग्मिन् विश्वानर कुट शप आत्रेये । जन जड खड ग्रीष्म अर्ह कित विशंप विशाल गिरि चपल चुप दासक वैल्य ( बैल्व ) प्राच्य [ धर्म्य ] आनडुह्य । पुंसि जाते । अर्जुन [ प्रहृत] सुमनस् दुर्मनस् मन ( मनन ) [ प्रान्त ] ध्वन । आत्रेय भरद्वाजे । भरद्वाज आत्रेये । उत्स आतव कितव [ वद धन्य पाद ] शिव खदिर । **इत्यश्वादिः** ॥ १५ ॥

२२२ **शिवादिभ्योऽण्** ४।१।११२ ॥ शिव प्रोष्ठ प्रोष्ठिक चण्ड जम्भ भूरि दण्ड कुठार ककुभ् ( ककुभा ) अनभिम्लान कोहित सुख संधि मुनि ककुत्स्थ कहोड कोहड कहूय कहय रोध कपिञ्जल ( कुपिञ्जल ) खञ्जन वतण्ड तृणकर्ण क्षीरह्रद जलह्रद परिल । ( पथिक ) पिष्ट हैहय [ पार्षिका ] गोपिका कपिलिका जटिलिका बधिरिका मञ्जीरक मजिरक वृष्णिक खञ्जास खञ्जाह [ कर्मार ] रेख लेख आलेखन विश्रवण रवण वर्तनाक्ष ग्रीवाक्ष [ पिटप विटक ] पिटाक तृक्षाक नभाक ऊर्णनाभ जरत्कारु [ पृथा उत्क्षेप ] पुरोहितिका सुरोहितिका सुरोहिका आर्यश्वेत ( अर्यश्वेत ) सुपिष्ट मसुरकर्ण मयूरकर्ण [ खर्जुरकर्ण ] कदूरक तक्षन् ऋष्टिषेण गङ्गा विपाश कस्क लह्य द्रुह्य अयस्थूण तृणकर्ण ( तृण कर्ण ) पर्ण भलन्दन विरूपाक्ष भूमि इला सपत्नी । द्व्यचो नद्याः । त्रिवेणी त्रिवणं च ॥ **इति शिवादिः** ॥ **आकृतिगणः** ॥ १६ ॥

२२३ **शुभ्रादिभ्यश्च** ४।१।१२३ ॥ शुभ्र विष्ट पुर ( विष्टपुर ) ब्रह्मकृत शतद्वार शलाथल शलाकाभ्रू लेखाभ्रू ( लेखाभ्र ) विकंसा ( विकास रोहिणी रुक्मिणी धर्मिणी दिश् शालूक अजबस्ति शकंधि विमातृ विधवा शुक विश देवतर

शकुनि शुक्र उग्र ज्ञातल ( श तल ) बन्धकी सृकण्डु विसि अतिथि गोदन्त कुशाम्ब मकष्टु शाताहर पवष्टुरिक सुनामन् । लक्ष्मणश्यामयोर्वासिष्ठे । गोधा कृकलास अणीव प्रवाहण भरत ( भारत ) भरम मृकण्डु कर्पूर इतर अन्यतर आलीढ सुदन्त सुदक्ष सुवक्षस् सुदामन् कद्रु तुद अकशाय कुमारिका कुठारिका किशोरिका अम्बिका जिह्माशिन् परिधि वायुदत्त शकल शलाका खड्डूर कुबेरिका अशोका गन्धपिङ्गला खडोन्मत्ता अनुदृष्टिन् ( अनुदृष्टि ) जरतिन् बलीवर्दिन् विप्र बीज जीव श्वन् अश्मन् अश्व अजिर ॥ **इति शुभ्रादिः ॥ आकृतिगणः ॥ १७ ॥**

२२४ **कल्यण्यादीनामिनङ् च** ४।१।१२६ ॥ कल्याणी सुभगा दुर्भगा बन्धकी अनुदृष्टि अनुसृति ( अनुसृष्टि ) जरती बलीवर्दी ज्येष्ठा कनिष्ठा मध्यमा परस्त्री ॥ **इति कल्याण्यादिः ॥ १८ ॥**

२२४ **गृष्ट्यादिभ्यश्च** ४।१।१३६ ॥ गृष्टि हृष्टि बलि हलि विश्रि कुद्रि अजबस्ति मित्रयु ॥ **इति गृष्ट्यादिः ॥ १९ ॥**

२२७ **रेवत्यादिभ्यष्ठक्** ४।१।१४६ ॥ रेवती अश्वपाली मणिपाली द्वारपाली वृकवञ्चिन् वृकबन्धु वृकग्राह कर्णग्राह दण्डग्राह कुक्कुटाक्ष ( ककुदाक्ष चामरग्राह ) ॥ **इति रेवत्यादिः ॥ २० ॥**

२२७ **कुर्वादिभ्यो ण्यः** ४।१।१५१ ॥ कुरु गर्गर मङ्गुष अजमार रथकार वावदूक । सम्राजः क्षत्रिये । कवि मति ( विमति ) कापिञ्जलादि वाक् वामरथ पितृमत् इन्द्रजाली एजि वातकि दामोष्णीषि गणकारि कैशोरि कुट शालाका ( शलाका ) मुर पुर एरका शुभ्र अभ्र दर्भ केशिनी । वेनाच्छन्दसि । शूर्पणाय श्यावनाय श्यावरथ श्यावपुत्र सत्यंकार वडभीकार पथिकार मूढ शकन्धु शङ्कु शाक शालिन् शालीन कर्तृ हर्तृ इन पिण्डि । वामरथस्य कण्वादिवत्स्वर वर्जम् ॥ **इति कुर्वादिः ॥ २१ ॥**

२२७ **तिकादिभ्यः फिञ्** ४।१।१५४ ॥ तिक कितव संज्ञाबालशिख ( संज्ञा बाला शिखा ) उरस् शाट्य सैन्धव यमुन्द रूप्य ग्राम्य नील अमित्र गोकक्ष ( गौकक्ष्य ) कुरु देवरथ तैतल औरस कौरव्य भौरिकि भौलिकि चौपयत चैटयत शीकयत क्षैतयत वाजवत् चन्द्रमस् शुभ गङ्गा वरेण्य सुपामन् आरब्ध वाह्यक खल्पक वृष लोमक उदन्य यज्ञ ॥ **इति तिकादिः ॥ २२ ॥**

२२८ **वाकिनादीनां कुक् च** ४।१।१५८ ॥ वाकिन गौधेर कार्कश काक लङ्का । चर्मिवर्मिणोर्नलोपश्च ॥ **इति वाकिनादिः ॥ २३ ॥**

२२९ **कम्बोजाल्लुक्** ४। १। १७५ ॥ कम्बोज चोल केरल शक यवन ॥ **इति कम्बोजादिः ॥ २४ ॥**

२२९ **न प्राच्यभर्गादियौधेयादिभ्यः** ४।१।१७८ ॥ भर्ग करूश केकय कश्मीर साल्व सुस्थाल उरस् कौरव्य ॥ **इति भर्गादिः ॥ २५ ॥**

२ यौधेय शौक्रेय शौभ्रेय ज्यावाणेय धौर्तेय धार्तेय त्रिगर्त भरत उशीनर ॥ **इति यौधेयादिः ॥ २६ ॥**

२३४ **भिक्षादिभ्योऽण्** ४।२।३८ ॥ भिक्षा गर्भिणी क्षेत्र करीष अङ्गार चर्मिन् धर्मिन् सहस्र युवति पदाति पद्धति अथर्वन् दक्षिणा भरत विषय श्रोत्र ॥ **इति भिक्षादिः ॥ २७ ॥**

२३५ **खण्डिकादिभ्यश्च** । ४।२।४५ ॥ खण्डिका वडवा । क्षुद्रकमालवात् सेना । संज्ञायाम् । भिक्षुक शुक उलूक श्वन् अहन् युगवरत्रा हलबन्धा ॥ **इति खण्डिकादिः ॥ २८ ॥**

२३५ **पाशादिभ्यो यः** ४।२।४९ ॥ पाश तृण धूम वात अङ्गार पाटल पोत गल पिटक पिटाक शकट हल नट वन ॥ **इति पाशादिः ॥ २९ ॥**

२३५ ॐ **खलादिभ्य इनिर्वक्तव्यः** ॐ ४।२।५१ ॥ खल डाक कुटुम्ब शाक कुण्डलिनी ॥ **इति खलादिराकृतिगणः ॥ ३० ॥**

२३५ **राजन्यादिभ्यो वुञ्** ४।२।५३ ॥ राजन्य आनृत बाभ्रव्य शालङ्कायन दैवयातव ( देवयात ) [ अव्रीड वरत्रा ] जालंधरायण [ राजायन ] तेलु आत्मकामेय अम्बरीषपुत्र वसाति बैल्ववन शैलूष उदुम्बर तीव्र बैल्वल आर्जुनायन संप्रिय दाक्षि ऊर्णनाभ ॥ **इति राजन्यादिराकृतिगणः ॥ ३१ ॥**

२३५ **भौरिक्याद्यैषुकार्यादिभ्यो विधलभक्तलौ** ४।२।५४ ॥ भौरिकी भौलिकी चौपयत चौटयत ( चैटयत ) काणेय वाणिजक वाणिकाज्य ( वालिकाज्य ) सैकयत वैकयत ॥ **इति भौरिक्यादिः ॥ ३२ ॥**

२ ऐषुकारि सारस्यायन ( सारसायन ) चान्द्रायण द्याक्षायण त्र्याक्षायण औडायन जौलायन खाडायन दासामित्रि दासमित्रायण शौद्रायण दाक्षायण शापण्डायन ( शायण्डायन ) तार्क्ष्यायण शौभ्रायण सौवीर [ सौवीरायण ] शपण्ड

( शयण्ड ) शौण्ड शयाण्डि ( शयाण्ड ) वैश्वमानव वैश्वध्येनव ( वैश्वधेनव ) नड तुण्डदेव विश्वदेव [ सापिण्डि ] ॥ **इत्यैषुकार्यादिः ॥ ३३ ॥**

२३६ **क्रतूक्थादिसूत्रान्ताट्ठक्** ४।२।६० ॥ उक्थ लोकायत न्यास न्याय पुनरुक्त निरुक्त निमित्त द्विपदा ज्योतिष अनुपद अनुकल्प यज्ञ धर्म चर्चा क्रमेतर श्लक्ष ( श्लक्ष्ण ) संहिता पदक्रम संघट ( संघट्ट ) वृत्ति परिषद् संग्रह गण [ गुण ] आयुर्देव ( आयुर्वेद ) **इत्युक्थादिः ॥ ३४ ॥**

२३६ **क्रमादिभ्यो वुन्** ४।२।६१ ॥ क्रम पद शिक्षा मीमांसा सामन् ॥ **इति क्रमादिः ॥ ३५ ॥**

२३६ **वसन्तादिभ्यष्ठक्** ४।२।६३ ॥ वसन्त ग्रीष्म वर्षा शरद शरत् हेमन्त शिशिर प्रथम गुण चरम अनुगुण अथर्वन् आथर्वण ॥ **इति वसन्तादिः ॥ ३६ ॥**

२३८ **संकलादिभ्यश्च** ४।२।७५ ॥ संकल पुष्कल उत्तम उडुप उद्वेप उत्पुट कुम्भ निधान सुदक्ष सुदत्त सुभूत सुपूत सुनेत्र सुमङ्गल सुपिङ्गल सूत सिकत पूतिका ( पूतिक ) पूलास कूलास पलाश निवेश ( गवेश ) गम्भीर इतर आन् अहन् लोमन् वेमन् चरण ( वरुण ) बहुल सद्योज अभिषिक्त गोभृत् राजभृत् भल्ल मल्ल माल ॥ **इति संकलादिः ॥ ३७ ॥**

२३८ **सुवास्त्वादिभ्योऽण्** ४।२।७७ ॥ सुवास्तु ( सुवस्तु ) वर्ण भण्डु खण्डु सेवालिन् कर्पूरिन् शिखण्डिन् गर्त कर्कश शकटीकर्ण कृष्णकर्ण [ कर्क ] कर्कन्धुमती गोह अहिसक्थ ॥ **इति सुवास्त्वादिः ॥ ३८ ॥**

२३८ **वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृणप्रेक्षाश्मसखिसंकाशबलपक्षकर्णसुतंगमप्रगदिन्वराहकुमुदादिभ्यः** ४।२।८० ॥

१ अरीहण ( अहीरण ) द्रुघण द्रुहण भलग ( भगल ) उलन्द किरण सांपरायण क्रौष्ट्रायण औष्ट्रायण त्रैगर्तायन मैत्रायण भास्त्रायण वैमतायण ( वैमतायन ) गौमतायन सौमतायन सौसायन धौमतायन सौमायन ऐन्द्रायण कौद्रायण ( कौन्द्रायण ) खाडायन शाण्डिल्यायन रायस्पोष विपथ विपाश उद्दण्ड उदञ्चन खाण्डवीरण वीरण काशकृत्स्न जाम्बवत शिंशपा रैवत ( रेवत ) बिल्व सुयज्ञ शिरीष बधिर जम्बु खदिर सुशर्मन् ( सशर्मन् ) भलतृ भलन्दन खण्डु कलन यज्ञदत्त ॥ **इत्यरीहणादिः ॥ ३९ ॥**

२ कृशाश्व अरिष्ट अरिश्म वेश्मन् विशाल लोमश रोमश लोमक रोमक शबल कूट वर्चल सुवर्चल सुकर सूकर प्रातर ( प्रतर ) सदृश पुरग पुराग मुख धूम अजिन विनत अवनत कुविद्यास ( कुविद्यास ) पराशर अरुस् अयस् मौद्गल्याकर ( मौद्गल्य युकर ) ॥ **इति कृशाश्वादिः ॥ ४० ॥**

३ ऋश्य ( हृष्य ) न्यग्रोध शर निलीन [ निवास निवात ] निधान निबन्धन (निबन्ध) [ विबद्ध ] परिगूढ [ उपगूढ ] असनी सित मत् वेश्मन् उत्तराश्मन् अश्मन् स्थूल बाहु खदिर शर्करा अनडुह ( अनडुह्ह ) अरडु परिवंश वेणु वीरण खण्ड दण्ड परिवृत्त कर्दम अंशु ॥ **इत्यृश्यादिः ॥ ४१ ॥**

४ कुमुद शर्करा न्यग्रोध इक्कट संकट कङ्कट गर्त बीज परिवाप निर्यास शकट कच मधु शिरीष अश्व अश्वत्थ बल्वज यवास कूप विकण्टक दशग्राम ॥ **इति कुमुदादिः ॥ ४२ ॥**

५ काश पाश अश्वत्थ पलाश पीयूक्षा चरण वास नड वन कर्दम कच्छूल कङ्कट गुह बिस तृण कर्पूर बर्बर मधुर ग्रह कपित्थ जतु सीपाल ॥ **इति काशादिः ॥ ४३ ॥**

६ तृण नड मूल वन पर्ण वर्ण वराण बिल पुल फल अर्जुन अर्ण सुवर्ण बल चरण बुस ॥ **इति तृणादिः ॥ ४४ ॥**

७ प्रेक्षा फलका ( हलका ) बन्धुका ध्रुवका क्षिपका न्यग्रोध इक्कट कङ्कट संकट कट कूप बुक पुक पुट मह परिवाप यवाष धुवका गर्त कूपक हिरण्य ॥ **इति प्रेक्षादिः ॥ ४५ ॥**

८ अश्मन् यूथ ऊष मीन मद दर्भ वृन्द गुद खण्ड नग शिखा कोट पाम कन्द कान्द कुल गह्व गुड कुण्डल पीन गुह ॥ **इत्यश्मादिः ॥ ४६ ॥**

९ सखि अग्निदत्त वायुदत्त सखिदत्त [ गोपिल ] भल्लपाल ( भल्ल पाल ) चक्र चक्रवाक छगल अशोक करवीर वासव वीर पूर वज्र कुशीरक शीहर ( सीहर ) सरक सरस समर समल सुरस रोह तमाल कदल सप्तल ॥ **इति सख्यादिः ॥ ४७ ॥**

२३८ १० संकाश कपिल कश्मीर [ समीर ] सूरसेन सरक सूर । सुपथिन्पन्थ च । यूप ( यूथ ) अंश अङ्ग नासा पलित अनुनाश अश्मन् कूट मलिन दश कुम्भ शीर्ष विरन्त ( विरत ) समल सीर पञ्जर मन्थ नल रोमन् लोमन् पुलिन सुपरि कटिप सकर्णक वृष्टि तीर्थ अगस्ति विकर नासिका ॥ **इति संकाशादिः** ॥ ४८ ॥

११ बल चुल नल दल वट लकुल उरल पुल ( पुल ) मूल उलडुल ( उल डुल ) वन कुल ॥ **इति बलादिः** ॥ ४९ ॥

१२ पक्ष तुक्ष तुष कुण्ड अण्ड कम्बलिका वलिक चित्र अस्ति । पथः पन्थ च । कुम्भ सीरक सरक सकल सरस समल अतिश्वन् रोमन् लोमन् हस्तिन् मकर लोमक शीर्ष निवात पाक सहक ( सिंहक ) अङ्कुश सुवर्णक हंसक हिंसक कुत्स बिल खिल यमल हस्त कला सकर्णक ॥ **इति पक्षादिः** ॥ ५० ॥

१३ कर्ण वसिष्ठ अर्क अर्कलूष द्रुपद आनडुह्य पाञ्चजन्य स्फिग ( स्फिज् ) कुम्भी कुन्ती जित्वन् जीवन्त कुलिश आण्डीवत् ( आण्डीवत ) जव जैत्र आकन ( आनक ) ॥ **इति कर्णादिः** ॥ ५१ ॥

१४ सुतंगम मुनिचित विप्रचित्त महाचित्त महापुत्र स्वन श्वेत गडिक ( खडिक ) शुक्र विग्र बीजवापिन् ( वीजवापिन् ) अर्जुन श्वन् अजिर जीव खण्डित कर्ण विग्रह ॥ **इति सुतंगमादिः** ॥ ५२ ॥

१५ प्रगदिन् मगदिन् मददिन् कविल खण्डित गदित चूडार मडार मन्दार कोविदार ॥ **इति प्रगद्यादिः** ॥ ५३ ॥

१६ वराह पलाशा ( पलाश ) शेरीष ( शिरीष ) पिनद्ध निबद्ध बलाह स्थूल विदग्ध [ विजग्ध ] विभग्न [ निमग्न ] बाहु खदिर शर्करा ॥ **इति वराहादिः** ॥ ५४ ॥

१७ कुमुद गोमथ रथकार दशग्राम अश्वत्थ शाल्मलि [ शिरीष ] मुनिस्थल कुण्डल कूट मधुकर्ण घासकुन्द शुचिकर्ण ॥ **इति कुमुदादिः** ॥ ५५ ॥

२३९ **वरणादिभ्यश्च** ४।२।८२ ॥ वरणा शृङ्गी शाल्मलि शुण्डि शयाण्डी पर्णी ताम्रपर्णी गोद आलिङ्ग्यायन जालपदी ( जानपदी ) जम्बू पुष्कर चम्पा पम्पा वल्गु उज्जयिनी गया मथुरा तक्षशिला उरसा गोमती वलभी ॥ **इति वरणादिः** ॥ ५६ ॥

२३९ **मध्वादिभ्यश्च** ४।२।८६ ॥ मधु बिस स्थाणु वेणु कर्कन्धु शमी करीर हिम किशरा शर्याण मरुत् वार्दाली शर इष्टका आसुति शक्ति आसन्दी शकल शलाका आमिषी इक्षु रोमन् रुष्टि रुप्य तक्षशिला कड वट वेट ॥ **इति मध्वादिः** ॥ ५७ ॥

२३९ **उत्करादिभ्यश्छः** ४।२।९० ॥ उत्कर संफल शफर पिप्पल पिप्पलीमूल अश्मन् सुवर्ण खलाजिन तिक कितव अणक त्रैवण पिचुक अश्वत्थ काश क्षुद्र भस्त्रा शाल जन्या अजिर चर्मन् उत्क्रोश क्षान्त खदिर शूर्पणाय श्यावनाय नैवावक तृण वृक्ष शाक पलाश विजिगीषा अनेक आतप फल संपर अर्क गर्त अग्नि वैराणक इडा अरण्य निशान्त पण नीचायक शंकर अवरोहित क्षार विशाल वेत्र अरीहण खण्ड वातागार मन्त्रणार्ह इन्द्रवृक्ष नितान्तवृक्ष आर्द्रवृक्ष ॥ **इत्युत्करादिः** ॥ ५८ ॥

२३९ **नडादीनां कुक्च** ४।२।९१ ॥ नड प्लक्ष बिल्व वेणु वेत्र वेतस इक्षु काष्ठ कपोत तृण कुञ्चा हस्खलं च । तक्षन्नलोपश्च ॥ **इति नडादिः** ॥ ५९ ॥

२४० **कत्र्यादि ढकञ्** ४।२।९५ ॥ कत्रि कुम्भि पुष्कर पुष्कल मोदन कुम्भी कुण्डिन नगरी माहिष्मती वर्मती उख्या ग्राम । कुड्याया यलोपश्च ॥ **इति कत्र्यादिः** ॥ ६० ॥

२४० **नद्यादिभ्यो ढक्** ४।२।९७ ॥ नदी मही वारणसी श्रावस्ती कौशाम्बी वनकौशाम्बी काशपरी काशफारी ( काशफरी ) खादिरी पूर्वनगरी पाठा माया शाल्वा दार्वा सेतकी । वडवाया वृषे ॥ **इति नद्यादिः** ॥ ६१ ॥

२४१ **प्रस्थोत्तरपदपलद्यादिकोपधादण्** ४।२।११० ॥ पलदी परिषद् रोमक वाह्लीक कलकीट बहुकीट जालकीट कमलकीट कमलकीर कमलभिदा गौष्ठी नैकती परिखा शूरसेन गोमती पटच्चर उदपान यकृल्लोम ॥ **इति पलद्यादिः** ॥ ६२ ॥

